श्री ललितार्या कवच स्तोत्रं

श्री ललितार्या कवच स्तोत्रं

अगस्त्य उवाच |
हयग्रीव महाप्राज्ञ मम ज्ञानप्रदायक |
ललिता कवचं ब्रूहि करुणामयि चेत्तव || 1 ||

हयग्रीव उवाच |
निदानं श्रेयसामेतल्ललितावर्मसंज्ञितं |
पठतां सर्वसिद्धिस्स्यात्तदिदं भक्तितश्शृणु || 2 ||

ललिता पातु शिरो मे ललाटमंबा मधुमतीरूपा |
भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वंद्वं || 3 ||

पायान्नासां बाला सुभगा दंतांश्च सुंदरी जिह्वां |
अधरोष्ठमादिशक्तिश्चक्रेशी पातु मे सदा चुबुकं || 4 ||

कामेश्वर्यवतु कर्णौ कामाक्षी पातु मे गंडयोर्युग्मं |
शृंगारनायिकाख्या वक्त्रं सिंहासनेश्वर्यवतु गळं || 5 ||

स्कंदप्रसूश्च पातु स्कंधौ बाहू च पाटलांगी मे |
पाणी च पद्मनिलया पायादनिशं नखावळिं विजया || 6 ||

कोदंडिनी च वक्षः कुक्षिं पायात्कुलाचलात्तभवा |
कल्याणीत्ववतु लग्नं कटिं च पायात्कलाधरशिखंडा || 7 ||

ऊरुद्वयं च पायादुमा मृडानी च जानुनी रक्षेत् |
जंघे च षोडशी मे पायात्पादौ च पाशसृणिहस्ता || 8 ||

प्रातः पातु परा मां मध्याह्ने पातु मां मणिगृहांतस्था |
शर्वाण्यवतु च सायं पायाद्रात्रौ च भैरवी सततं || 9 ||

भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिंदुग्रहपीठा |
श्रीविद्या च यशो मे शीलं चाव्याच्चिरं महाराज्ञी || 10 ||

पवनमयि पावकमयि क्षोणीमयि व्योममयि कृपीटमयि |
श्रीमयि शशिमयि रविमयि समयमयि प्राणमयि शिवमयीत्यादि || 11 ||

काली कपालिनी शूलिनी भैरवी मातंगी पंचमी त्रिपुरे |
वाग्देवी विंध्यवासिनी बाले भुवनेशि पालय चिरं मां || 12 ||

अभिनवसिंदूराभामंब त्वां चिंतयंति ये हृदये |
उपरि निपतंति तेषामुत्पलनयना कटाक्षकल्लोलाः || 13 ||

वर्गाष्टपंक्तिकाभिर्वशिनी मुखाभिरधिकृतां भवतीं |
चिंतयतां पीतवर्णां पापोनिर्यात्य यत्नतो वदनात् || 14 ||

कनकलतावद्गौरीं कर्ण व्यालोल कुंडल द्वितयां |
प्रहसितमुखीं च भवतीं ध्यायंतोये भवंति मूर्धन्याः || 15 ||

शीर्षांभोरुहमध्ये शीतलपीयूषवर्षिणीं भवतीं |
अनुदिनमनुचिंतयतामायुष्यं भवति पुष्कलमवन्यां || 16 ||

मधुरस्मितां मदारुणनयनां मातंगकुंभवक्षोजां |
चंद्रावतंसिनीं त्वां सततं पश्यंति सुकृतिनः केचित् || 17 ||

ललितायाः स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः |
अनुदिनमनुचिंतयतां फलानिवक्तुं प्रगल्भते न शिवः || 18 ||

पूजा होमस्तर्पणं स्यान्मंत्रशक्तिप्रभावतः |
पुष्पाज्य तोयाभावेपि जपमात्रेण सिद्ध्यति || 19 ||

इति श्रीललितार्याकवचस्तोत्ररत्नं |